# शास्त्रितृतीयवर्षम्
# पञ्चमपत्रम्-प्राचीनन्यायवैशेषिकम्
# शैक्षिकनिष्पत्तिः

ग्रन्थः – वैशेषिकसूत्रोपस्कारः(पञ्चमाध्यायात् आन्तम्)

पाठ्यग्रन्थस्यास्य अध्ययनेन छात्राः-

- ❖ कर्मलक्षणपरीक्षणं, प्रयत्नाधीनं, चेष्टाधीनं, संयोगाधीनं, गुरुत्वाधीनं, पुण्यपापाजनकवधजनकम्, अदृष्टाधीनं, वेगजनकं च कर्माणि विजानीयुः।
- ❖ भूकम्पादौ, जलादिस्यन्दने, जलस्य वृक्षाभ्यन्तरेणोर्ध्वगमने, हिमकरकाद्युत्पत्तौ, वज्रनिर्घोषे, दिग्दाहझञ्झादौ, मनःकर्मणि, मनसः स्थैर्यसम्पादने, मरणदशायां मनसो देहादुत्क्रमणे, देहान्तरप्रवेशे च कारणविशेषम् अधिगच्छेयुः।
- ❖ तमसः क्लृप्तद्रव्येष्वन्तर्भावं, आकाशादीनां निष्क्रियत्वं, गुणादिसमवायस्य अजन्यत्वं, गुणादीनाम् असमवायिकारणत्वं च ज्ञातुं समर्थाभवेयुः।
- ❖ वेदप्रामाण्यं, धर्मादीनां स्वर्गादिसाधनत्वं, श्राद्धदानादौ दुष्टब्राह्मणत्यागं, दुष्टसंसर्गात् दोषोत्पत्तिं, दानादौ प्रतिगृहीतृस्वरूपम्, आपत्कालीनकृत्यविशेषं चाधिगच्छेयुः।
- ❖ धर्मफलम्, अदृष्टहेतुकर्मविशेषं, धर्मसाधनं, शुच्यशुचिस्वरूपं, संयमस्य कर्मसहकारित्वं, दोषकारणं, धर्मादीनां प्रेत्यभावनिदानत्वं, मोक्षोपायं च जानीयुः।
- ❖ रूपादीनां नित्यत्वानित्यत्वविवेकं, क्वचित्कारणगुणपूर्वकत्वं, क्वचिच्चापाकजत्वं, परिमाणपरीक्षणं, विभुपरिमाणविशेषं, मनसो महत्वाभावं च विजानीयुः।

- ❖ संख्यापृथक्त्वयोः स्वरूपविभागादीन्, गुणानां निःसंख्यात्वम्, अवयवावयविनोरभेदमतनिरासं, संयोगविभागयोः लक्षणविभागादीन्, अवयवावयविनोः संयोगविभागाभावं, पदपदार्थयोः साङ्केतिकसम्बन्धं, परत्वापरत्वसमवायानां लक्षणस्वरूपादिकं चावगच्छेयुः।
- ❖ प्रत्यक्षहेतुसन्निकर्षविशेषान्, अर्थपदपरिभाषाम्, इन्द्रियविशेषाणाम् उपादानविशेषग्रहविशेषौ, अभावस्य स्वरूपविभागादीन्, अत्यन्ताभाव-अन्योन्याभावयोः प्रत्यक्षविचारं, योगजसन्निकर्षजन्यप्रत्यक्षविशेषं चाधिगच्छेयुः।
- ❖ लिङ्गज्ञानं, शाब्दोपमित्योः अनुमितावन्तर्भावं, स्मृतिस्वरूपं, स्वप्न-स्वाप्निकज्ञानहेतुं, विद्याऽविद्ययोः लक्षणम्, आर्षज्ञानहेतुं च ज्ञातुं प्रभवेयुः।
- ❖ सुस्वप्न-दुःस्वप्नयोर्भेदं, तयोः ज्ञानातिरिक्तत्वं, शरीरावयवानां परस्परभेदं, कारणत्रैविध्यं, श्रुतिप्रामाण्यस्य दार्ढ्यत्वं च विजानीयुः।

**********